**CLASS-IX** 9/2012

**विषय : संस्कृतम् सम्प्रेषणात्मकम्**

**निर्धारितसमयः - होरात्रयम्** **पूर्णाङ्काः - 90**

*निर्देशाः - (1) अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।*

*खण्डः 'क' (अपठित-अवबोधनम्) - 10 अङ्काः*

*खण्डः 'ख' (रचनात्मक-कार्यम्) - 15 अङ्काः*

*खण्डः 'ग' (अनुप्रयुक्त-व्याकरणम्) - 30 अङ्काः*

*खण्डः 'घ' (पठित-अवबोधनम्) - 35 अङ्काः*

*(2) सर्वे प्रश्नाः अनिवार्याः।*

*(3) प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि।*

*(4) प्रश्नसंख्या अवश्यं लेखनीया।*

*(5) उत्तराणि संस्कृतेन एव लेखनीयानि।*

**खण्डः 'क' (अपठित-अवबोधनम्)**

प्र1. अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नानां उत्तराणि संस्कृतेन लिखत - (10)

एकदा एकः वैदेशिकः प्रथमराष्ट्रपतेः श्री राजेन्द्रप्रसादस्य गृहं प्राप्तवान्। राष्ट्रपतेः परिचारकः तम् आतिथ्यगृहे प्रतीक्षितुम् अकथयत् तम् असूचयत् च यद् राष्ट्रपतिमहोदयाः सम्प्रति पूजां कुर्वन्ति सः अतिथिः ज्ञातुम् ऐच्छत् यद् राष्ट्रपतिः कथं करोति पूजाम्? सङ्कोचं कुर्वन् अपि स अन्तः पूजागृहं प्रविष्टः। राष्ट्रपतेः समक्षं विद्यमानं मृत्पिण्डं सोऽवन्दत श्रद्धया च तत्र उपाविशत्। पूजां परिसमाप्य राष्ट्रपतिमहोदयः ससम्मानं तम् अन्तः अनयत्। श्री राजेन्द्रमहोदयः तस्य कौतूहलं विज्ञाय तस्मै समबोधयत् - एतत् मृत्पिण्डं भारतस्य भूम्याः प्रतीकम् अस्ति। वयं मृत्तिकायाः कणेषु ईश्वरस्य दर्शनमपि कुर्मः। अस्माकं विचारे तु मानवेषु, पशुपक्षिषु, पाषाणेषु, वृक्षादिषु किं वा अचेतनेषु अपि ईश्वरस्य सत्ता अस्ति।

*प्रश्नाः*

(I) एकपदेन उत्तरत - (½x4=2)

(i) श्री राजेन्द्रप्रसादस्य गृहं कः प्राप्तवान्?

(ii) मानवेषु, पशुपक्षिषु, पाषाणेषु, वृक्षादिषु अपि कस्या सत्ता अस्ति?

(iii) वयं कुत्र ईश्वरस्य दर्शनमपि कुर्मः?

(iv) राष्ट्रपतेः परिचारकः तं कुत्र प्रतीक्षितुम् अकथयत्?

(II) पूर्णवाक्येन उत्तरत - (1x2=2)

(i) अतिथिः कि ज्ञातुम् ऐच्छत्?

(ii) श्री राजेन्द्रमहोदयः आगन्तुकं किं समबोधयत्?

(III) अस्य अनुच्छेदस्य कृते उचितम् शीर्षकं लिखत। (2)

(IV) निर्देशानुसारम् उत्तरत -

(i) 'एकदा एकः वैदेशिकः प्रथमराष्ट्रपतेः श्रीराजेन्द्रप्रसादस्य गृहं प्राप्तवान्' अत्र 'प्राप्तवान्' इति क्रियापदस्य किम् कर्तृपदम् अस्ति? (1x4=4)

(अ) वैदेशिकः (ब) प्रथमराष्ट्रपतेः
(स) श्रीराजेन्द्रप्रसादस्य (द) एकः

(ii) 'बहिः' पदस्य किं विपर्ययम् अनुच्छेदे प्रयुक्तम्?

(अ) समक्षम् (ब) सम्पदम्
(स) अन्तः (द) विद्यमानम्

(iii) 'तस्मै' इति सर्वनामपदं कस्मै प्रयुक्तम्?

(अ) परिचारकस्य (ब) आगन्तुकाय
(स) राजेन्द्रप्रसादाय (द) पाषाणाय

(iv) 'एतत्' पदस्य किम् विशेष्यपदम् प्रयुक्तम्?

(अ) सम्पदम् (ब) महतीम्
(स) भारतीयाः (द) मृत्पिण्डम्

**खण्डः 'ख' (रचनात्मक-कार्यम्)**

प्र2. भवान् अशोकः अस्ति। परीक्षापरिणामस्य विषये स्वपितरं प्रति लिखिते अस्मिन् पत्रे मञ्जूषायाः रिक्तस्थानानि पूरयित्वा पत्रं पुनः लिखत। (½x10=5)

| मञ्जूषा |
|---|
| अभ्यासेन, नमस्कारः, प्रियपुत्रः, परीक्षायाः, अहम्, परीक्षायाम्, ज्ञात्वा, अङ्कान्, नमोनमः, अधिकम् |

छात्रावासः
दिल्लीतः
दिनाङ्कः ________

आदरणीय पितृमहोदय!

(i)________। शुभसमाचारः अस्ति यत् मम अर्धवार्षिक्याः (ii)________ परिणामः आगतः। अहं (iii)________ अशीतिः अङ्कानि अगृह्णम्। किन्तु इदं (iv)________ भवानपि चिन्तितः भविष्यति यत् संस्कृतविषये (v)________ सुष्ठु अङ्कान् प्राप्तुं समर्थः न अभवम्। अद्यतः अहम् (vi)________ अभ्यासं करिष्यामि।

आशासे यत् (vii)________ भवतः आशीर्वादेन च आगामिवार्षिकपरीक्षायाम् प्रतिशतं नवतिः (viii)________ प्राप्स्यामि। मातरम् अग्रजम् प्रति अपि मम (ix)________ कथनीयः।

भवतः (x)________

अशोकः



प्र3. मञ्जूषायां प्रदत्तशब्दानां सहायतया चित्रं दृष्ट्वा पञ्चवाक्यानि संस्कृतेन लिखत। (2x5=10)

| मञ्जूषा |
|---|
| शोभनानि, खगाः, करोति, उद्यानम्, वृद्धः, व्यायाम, पिबन्ति, पुष्पाणि, हरीतिमा, विकसन्ति, विशालम्, तरन्ति, दण्डेन, जले, पश्यामः |



अथवा

मञ्जूषायां प्रदत्तशब्दानां सहायतया 'मम देशः' इति विषयम् अधिकृत्य पञ्चवाक्यानि संस्कृतेन लिखत।

| मञ्जूषा |
|---|
| मिलित्वा, आर्यावर्तः, धर्मनिरपेक्षः, उन्नतिपथम्, भारतीया, प्राचीनम्, देशः, भारतम्, नाम, अस्माकं, अस्ति, भविष्यति |

**खण्डः 'ग' (अनुप्रयुक्त-व्याकरणम्)**

प्र4. (i) अयं वर्णः चवर्गे नास्ति - (1)

(अ) छ् (ब) त्
(स) च् (द) ञ्

(ii) 'ह्' इति वर्णस्य उच्चारणस्थानं किम् अस्ति? (1)

(अ) दन्ताः (ब) तालुः
(स) कण्ठः (द) मूर्धा

(iii) उचितं वर्णम् चित्वा वर्णवियोजने रिक्तस्थानपूर्तिं कुरुत - (1)

कार्यम् = क् आ ____ य् अ म्

(अ) र् (ब) ऋ
(स) र (द) यृ

(iv) उचितं वर्णसंयोजनम् कुरुत - (1)

आ श् ई र् व् आ द् अः

(अ) आर्शिवादः (ब) आर्शीवादः

(स) आशीर्वादः (द) आशीरवादः

प्र5. अधोलिखितवाक्येषु रेखाङ्कितपदानां समुचितं सन्धिं विच्छेदं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत - (½x10=5)

(i) नारदः देव + ऋषिः कथ्यते।

(अ) देवरषिः (ब) देवरिषिः

(स) देवर्षिः (द) देवृषिः

(ii) हर्ष + उल्लासेन जन्मदिवसः प्रतिवर्षं मान्यते।

(अ) हर्षोल्लासेन (ब) हर्षुल्लासेन

(स) हर्षूल्लासेन (द) हर्षल्लासेन

(iii) हिमालयः अस्माकं प्रहरी।

(अ) हिम + लयः (ब) हिमा + लयः

(स) हिम + आलयः (द) हिमाल + यः

(iv) इत्युक्त्वा भीमः अगच्छत्।

(अ) इति + क्त्वा (ब) इति + उक्त्वा

(स) इत्यु + क्त्वा (द) इत्य + उक्त्वा

(v) जगत् + ईशः सर्वान् रक्षतु।

(अ) जगतीशः (ब) जगदीशः

(स) जगतिश (द) जगतेशः

(vi) गुरुं दृष्ट्वा कृष्णः उत् + लसितः जातः।

(अ) उल्लसितः (ब) उल्लासितः

(स) उल्लसितः (द) उलसितः

(vii) अहं रामं वन्दे।

(अ) राम + वन्दे (ब) रा + मवन्दे

(स) रामम् + वन्दे (द) रामन् + वन्दे

(viii) बालकः एतच्चित्रम् पश्यति।

(अ) एतत् + चित्रम् (ब) एतच् + चित्रम्

(स) एतम् + चित्रम् (द) एत + च्चित्रम्

(ix) एष आयाति विद्यालयात्।

(अ) एषा + आयाति (ब) एष + आयाति

(स) एषो + आयाति (द) एषः + आयाति



(x) सोऽपि मम मित्रम् अस्ति।

(अ) सो + ऽपि (ब) स + अपि

(स) सः + अपि (द) सो + अपि

प्र6. (क) उचितशब्दरूपाणि चित्वा रिक्तस्थानानि पूरयत - (½x6=3)

(i) _________ कविताः गायन्ति।

(अ) कविः (ब) कवीन्

(स) कवयः (द) कविभिः

(ii) बालकाः _________ गच्छन्ति।

(अ) विद्यालयान् (ब) विद्यालयम्

(स) विद्यालयन (द) विद्यालये

(iii) _________ पिता अध्यापकः अस्ति।

(अ) रमाम् (ब) रमायाम्

(स) रमायै (द) रमायाः

(iv) उद्याने अनेकानि _________ सन्ति।

(अ) पुष्पम् (ब) पुष्पे

(स) पुष्पाणि (द) पुष्पाः

(v) _________ सरोवरे नीलकमलानि सन्ति।

(अ) अनेन (ब) अस्मिन्

(स) अस्याम् (द) अस्याः

(vi) वृक्षाणाम् सुरक्षा _________ परमं कर्त्तव्यम्।

(अ) मत् (ब) अहम्

(स) माम् (द) अस्माकम्

(ख) कोष्ठके प्रदत्तयोः शब्दयोः उचितां विभक्तिं प्रयुज्य रिक्तस्थानं पूरयत - (1x2=2)

(i) माता _________ (पाकशाला) भोजनं पचति।

(ii) अहम् _________ (गृह) गमिष्यामि।

प्र7. (क) उचितधातुरूपाणि चित्वा रिक्तस्थानानि पूरयत - (½x6=3)

(i) स्वातिमुनिः संगीतसाधनस्य निर्माणम् _________।

(अ) करोषि (ब) अकरोत्

(स) करोमि (द) करिष्यन्ति

(ii) वयं सदा अध्यापकानाम् आज्ञायाः पालनं _________।

(अ) करोति (ब) करोमि

(स) करिष्यति (द) करिष्यामः

(iii) सः तु गृहं __________ ।

(अ) गच्छसि (ब) गच्छतः

(स) गच्छति (द) गच्छामि

(iv) यः परिश्रमं करोति सः सफलतां __________ ।

(अ) लभति (ब) लभन्ति

(स) लभते (द) लभन्ते

(v) रामः श्यामः च पितरौ __________ ।

(अ) सेवेते (ब) सेवति

(स) सेवते (द) सेवन्ति

(vi) ह्यः रामः प्रसन्नः न __________ ।

(अ) आसीः (ब) आसीत्

(स) आस्ताम् (द) आसन्

(ख) कोष्ठके प्रदत्तयोः धात्वोः उचितरूपे प्रयुज्य रिक्तस्थाने पूरयत - (1x2=2)

(i) सः याचकः यः __________ । (याच्, लट्लकारे)

(ii) राधा भोजनं __________ । (पच् धातुः लट्लकारे)

प्र8. (क) प्रदत्तविकल्पेभ्यः उचितपदं चित्वा रिक्तस्थानानि पूरयत - (1x3=3)

(i) __________ बहिः रक्षकः तिष्ठति ।

(अ) गृहम् (ब) ग्रहेण

(स) गृहात् (द) गृहस्य

(ii) सीता __________ सह वनम् अगच्छत् ।

(अ) रामे (ब) रामस्य

(स) रामम् (द) रामेण

(iii) __________ रामः श्रेष्ठः ।

(अ) राजनि (ब) राजाः

(स) राज्ञः (द) राजसु

(ख) कोष्ठके प्रदत्तशब्दयोः उचितविभक्तिप्रयोगेण वाक्यद्वयम् पूरयत - (1x2=2)

(i) __________ उभयतः वृक्षाः सन्ति । (राजमार्ग)

(ii) अहम् __________ (युष्मद्) निमन्त्रणपत्रं दास्यामि ।

प्र9. (क) प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा रिक्तस्थानानि पूरयत - (1x4=4)

(i) अहम् कुपथं __________ सुपथं ग्रहीष्यामि ।

(अ) परि + त्यज् + यत् (ब) परि + त्यज् + ल्यप्

(स) परि + त्यज् + क्त्वा (द) परि + त्यज् + तुमुन्



(ii) रामः विद्यालयं __________ पठति ।

(अ) गन्त्वा (ब) गत्वा

(स) गम्त्वा (द) गमित्वा

(iii) सः चलचित्रम् __________ गच्छति!

(अ) दृ + तुमुन् (ब) दृष् + तुमुन्

(स) दृश् + तुमुन् (द) दृष्ट + तुमुन्

(iv) निर्धनेभ्यः वस्त्राणि दत्वा (____ + क्त्वा) धनिकः सन्तुष्टः अभवत् ।

(अ) दत (ब) दत्वा

(स) दा (द) दत

(ख) अधोलिखितवाक्ययोः रेखाङ्कितपदयोः प्रकृतिप्रत्ययौ संयोज्य विभज्य वा लिखत । (1x2=2)

(i) तत्र __________ किम् करिष्यसि? (स्था + क्त्वा)

(ii) रामः क्रीडनकानि <u>क्रेतुम्</u> गमिष्यति । (___ + तुमुन्)

**खण्डः 'घ' (पठित-अवबोधनम्)**

प्र10. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -

किन्तु बालस्य अत्र रक्षकः। तत् किं करोमि। भवतु चिरकालपालितम् इमं पुत्रनिर्विशेषं नकुलं बालरक्षायां व्यवस्थाप्य गच्छामि । तथा कृत्वा गतः । ततः तेन नकुलेन बालसमीपम् उपसर्पन् कृष्णसर्पः दृष्टः । सः तं व्यापाद्य खण्डशः कृतवान् । अत्रान्तरे ब्राह्मणोऽपि श्राद्धं गृहीत्वा गृहमुपावृत्तः । ब्राह्मणं दृष्ट्वा नकुलः रक्तविलिप्तमुखपादः तच्चरणयोः अलुठत् । विप्रः तथाविधं तं दृष्ट्वा बालकोऽनेन खादितः इति अवधार्य कोपात् नकुलं व्यापादितवान् ।

*प्रश्नाः*

(I) एकपदेन उत्तरत - (½x2=1)

(i) अत्र कस्य रक्षकः नास्ति?

(ii) ब्राह्मणोऽपि किं गृहीत्वा गृहमुपावृत्तः?

(II) पूर्णवाक्येन उत्तरत - (2x1=2)

ब्राह्मणं दृष्ट्वा नकुलः किम् अकरोत्?

(III) उचितम् उत्तरम् चित्वा लिखत - (1x2=2)

(i) 'भक्षकः' इति पदस्य किम् विलोमपदम् गद्यांशे प्रयुक्तम्?

(अ) खण्डशः (ब) व्यापाद्य

(स) रक्षकः (द) दृष्टः

(ii) 'नकुलम्' इति पदस्य किम् विशेषणपदम् गद्यांशे प्रयुक्तम्?

(अ) गृहम् (ब) पुत्रनिर्विशेषम्

(स) श्राद्धं (द) भवतु

प्र11. अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -

पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम्।
मूढैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते ॥

*प्रश्नाः*

(I) एकपदेन उत्तरत - (½x2=1)

(i) पृथिव्यां कति रत्नानि?

(ii) कैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते?

(II) पूर्णवाक्येन उत्तरत - (2x1=2)

पृथिव्यां त्रीणि कानि रत्नानि सन्ति?

(III) उचितम् उत्तरम् चित्वा लिखत - (1x2=2)

(i) 'रत्नानि' इति पदस्य विशेषणपदम् किम् अस्ति?

(अ) पृथिव्यां (ब) अन्नम्
(स) त्रीणि (द) मूढैः

(ii) 'विधीयते' इति क्रियापदस्य कर्तृपदम् किम् अस्ति?

(अ) रत्नसंज्ञा (ब) पाषाण
(स) मूढैः (द) रत्नानि

प्र12. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -

सीता - (आत्मगतम्) नहि रूपमेव। स्वरयोगः अपि सः एव। (प्रकाशम्) वत्स चिरंजीव।
भरतः - अनुगृहीतोऽस्मि।
सीता - एहि वत्स, भातृमनोरथं पूरय।
रामः - एहि, एहि इक्ष्वाकुकुमार, स्वस्ति, आयुष्मान् भव।
भरतः - अनुगृहीतोऽस्मि।
वावद् भविष्यति भवन्नियमावसानम्।
तावद् भवेयमिह ते नृप पादमूले ॥

*प्रश्नाः*

(I) एकपदेन उत्तरत - (½x2=1)

(i) का कथयति - 'स्वरयोगः अपि स एव'?

(ii) 'एहि वत्स' अत्र वत्स इति पदं कस्मै प्रयुक्तम्?

(II) पूर्णवाक्येन उत्तरत - (2x1=2)

रामः भरतं किम् अकथयत्?



(III) उचितम् उत्तरम् चित्वा लिखत - (1x2=2)

(i) 'पूरय' इति क्रियापदस्य कर्ता कः?

(अ) भरतः (ब) रामः
(स) अहम् (द) त्वम्

(ii) 'आत्मगतम्' इति पदस्य किम् विलोमपदम् अत्र अस्ति?

(अ) स्वगतम् (ब) एहि
(स) प्रकाशम् (द) रूपम्

प्र13. अधोलिखितश्लोकयोः भावार्थं मञ्जूषातः उचितपदानि चित्वा पूरयत - (½x8=4)

| मञ्जूषा |
|---|
| उत्थानम्, दुष्टानाम्, तस्य, सत्संगत्याम्, कथितम्, दुष्टैः, शिलायां, सज्जनाः |

(क) सद्भिस्तु लीलया प्रोक्तं शिलालिखितमक्षरम्।
असद्भिः शपथेनापि जले लिखितमक्षरम् ॥

भावार्थः - ____(i)____ यत् किञ्चित् सामान्येन अपि कथयन्ति तत् ____(ii)____ लिखितम् इव भवति। परन्तु ____(iii)____ जनैः शपथेन ____(iv)____ अपि वाक्यं विश्वसनीयं न भवति।

(ख) यदि सत्सङ्गतिरतो भविष्यसि भविष्यसि।
अथ दुर्जनसंसर्गे पतिष्यति पतिष्यति ॥

भावार्थः - यदि मानवः ____(v)____ वसति तर्हि तस्य ____(vi)____ भवति यदि ____(vii)____ कुसंगत्यां वसति तर्हि ____(viii)____ पतनं निश्चितं भवति।

प्र14. निम्नलिखितश्लोकयोः अन्वयं मञ्जूषातः समुचितं पदं चित्वा पूरयत - (½x8=4)

| मञ्जूषा |
|---|
| पदम्, गुणी, मूर्खशतानि, तमः तारागणैः, वैनतेयः, याति, योजनानाम् |

(क) गच्छन् पिपीलको याति योजनानां शतान्यपि।
अगच्छन्वैनतेयोऽपि पदमेकं न गच्छति ॥

अन्वयः - गच्छन् पिपीलकः ____(i)____ शतानि अपि ____(ii)____। अगच्छन् ____(iii)____ एकम् अपि ____(iv)____ न गच्छति।

(ख) वरमेको गुणी पुत्रो न च मूर्खशतान्यपि।
एकश्चन्द्रस्तमो हन्ति न च तारागणैरपि ॥

अन्वयः - एकः (अपि) ____(v)____ पुत्रः वरम् ____(vi)____ अपि च न। एक चन्द्रः ____(vii)____ हन्ति ____(viii)____ अपि च (तत्) न (हन्यते)।

प्र15. (क) प्रदत्तविकल्पेभ्यः उचितम् पदम् चित्वा प्रश्ननिर्माणं कुरुत - (1x2=2)

(I) भरतः रामम् अभिवादयितुम् इच्छति।

(अ) कः (ब) कम्

(स) केन (द) कस्मै

(II) द्वादशवर्षीयं तं पुत्रम् आरुणिः उवाच।

(अ) कः (ब) कम्

(स) का (द) केन

(ख) (i) सत्पुरुषाः समृद्धिभिः अनुद्धताः भवन्ति। (1x2=2)

(ii) सः ब्राह्मणः नकुलम् बालरक्षायाम् अस्थापयत्।

प्र16. अधोलिखितवाक्यानि कथाक्रमेण संयोज्य लिखत - (½x8=4)

(i) आरुणिः श्वेतकेतुं वटफलम् आनेतुम् अकथयत्।

(ii) श्वेतकेतुः गुरोः सकाशाद् वेदान् अपठत्।

(iii) आरुणिः पुत्रं वटबीजस्य अन्तः द्रष्टुम् अकथयत्।

(iv) वेदान् अधीत्य श्वेतकेतुः अमन्यत - अहं श्रेष्ठः अस्मि।

(v) आरुणिः श्वेतकेतुम् आत्मनः विषये उपादिशत्।

(vi) वस्तुतः जगति आत्मा एव सत्।

(vii) आत्मज्ञानेन सर्वम् अविज्ञातं ज्ञातं भवति।

(viii) महर्षेः आरुणेः पुत्रः श्वेतकेतुः आसीत्।

प्र17. (I) प्रसङ्गानुसारम् रेखाङ्कितपदयोः उचितम् अर्थम् चित्वा लिखत - (1x2=2)

(i) अयं ते दयितो भ्राता भरतो भ्रातृवत्सलः।

(अ) दानशीलः (ब) दयाशीलः

(स) प्रियः (द) अप्रियः

(ii) न अनृतं ब्रूयात्।

(अ) असत्यम् (ब) सत्यम्

(स) प्रियम् (द) अप्रियम्

(II) शब्दानाम् अर्थैः सह मेलनं कुरुत - (½x4=2)

| | |
|---|---|
| (i) अर्थवान् | शत्रुः |
| (ii) रिपुः | दुःखम् |
| (iii) दुर्जनः | धनवान् |
| (iv) शोकः | दुष्टः |